IJIRSET

International Journal of Innovative Research in
SCIENCE | ENGINEERING | TECHNOLOGY

e-ISSN: 2319-8753 | p-ISSN: 2347-6710



# INTERNATIONAL JOURNAL OF INNOVATIVE RESEARCH

IN SCIENCE | ENGINEERING | TECHNOLOGY

Volume 11, Issue 8, August 2022

INTERNATIONAL STANDARD SERIAL NUMBER INDIA

Impact Factor: 8.118

International Journal of Innovative Research in Science, Engineering and Technology (IJIRSET)

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|

||Volume 11, Issue 8, August 2022||

| DOI:10.15680/IJIRSET.2022.1108076 |

# संस्कृतसाहित्येरामायणसाहित्यपरिपेक्षेयायावरीप्रवृत्तिरेकःविमर्शः

**शैलेन्द्रविक्रमः[1]प्रो. शुकदेवभोई[2] च**

1. विद्यावरिधिः (Ph.D.), शोधच्छात्रः, लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नईदिल्ली, ११००१६
2. प्रो. शुकदेवभोई, साहित्यविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, कटवारियासराय, नईदिल्ली, 110016. साम्प्रतिकुलपतिःBBMKUधनबाद,झारखंड, 826001

## I. सारांशः

रामायणेसंस्कृतसाहित्येवायायावराणांयायावरीप्रवृत्तेर्वासम्यक्तयाविवचनमालभते। यथाशोधपत्रेऽमुष्मिन्संस्कृतसाहित्यमाधृत्यरामायणमनुसृत्ययायावराणांसमीचीनंविवेचनंकृतम्मया। यायावराणांपरम्पराप्राचीनकालादेवप्रवाहमानावर्ततेयस्यांपरम्परायांमहर्षयःयथापरशुरामः, अगस्त्यः, विश्वामित्रादयः, मुनयः, नटाः, यायावरप्रजातयःयथानिषादराजगुह, किरातादयः, राजानःयथारामलक्षमणौ, सुग्रीवः, रावणः, भर्तृहरिः, हर्षः, मारीचादयः,कवयःयथावाल्मीकिः, व्यासः, भासः, कालिदासः, बाणः, भवभूतिः, कल्हणः, बिल्हणः, भारविः, राजशेखरजगन्नाथादयःबभूवुरिति। अतःपरम्परेयंसाहित्यसम्पन्ना, आचारप्रचुरा, नीतिपुष्टा, सामाजिकी, धार्मिकी, राजनैतिकीआध्यात्मिकीचासीदिति। परम्परायाममुष्यामेवआविश्वस्यआभारतस्य च सर्वोत्कृष्टंसाहित्यंविहितम्।

## II. परिचयः

यायावरवर्गस्यपरिचयः

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|

||Volume 11, Issue 8, August 2022||

| DOI:10.15680/IJIRSET.2022.1108076 |

अस्मिन्रामायणेविभिन्नप्रकाराणामरण्यानांवर्णनंप्राप्यतेएवयतोहियायावरसमूहाःएकस्मिन्नेवस्थानेस्थिताःनभवन्तिएतस्मात्तेसदैवाजीविकायाःभोजनस्यचकृतेप्रचाल्यमानाःवर्तन्ते।रामायणमादिकाव्यंमन्यन्तेविदग्धाः, अतःअस्याम्कथायांभरतीयायाःसंस्कृतेर्विशदविवरणं, तात्कालिकसभ्यतायाःवैशद्येनसुस्पष्टचित्रणं, अचारसंहितायाःसंकलनं, नीतिशिक्षायाःसंग्रहणं, गाम्भीर्यं, मार्मिकभावाभिव्यञ्जनमत्रविशदरूपेणलभते।अतएवभूयोभूयोमहाकाव्यमिदंसंस्तूयते।अस्मिन्तात्कालिकसभ्यतायाः, समाजस्य, संस्कृतेः, राजनीतेश्चविवरणंविशालरूपेणआप्नोत्येवएतस्मात्कारणादेवरामायणेविभिन्नप्रकाराणांयायावरसमुदायानांसमूहानांवाविवरणंप्राप्यते।

रामायणेरामस्यजीवनवृत्तस्यवर्णनमस्तियद्यपिरामस्यजीवनस्यार्धभागस्तुवनेएवव्यतीतः।रामायणेप्राप्तयायावरसमूहानामोल्लेखःविभिन्नरूपेषुदरीदृश्यतेयतोहियायावरशब्दस्यार्थेविचारःकर्तव्यः चेत्तर्हिशब्दस्यार्थःभवतिविचरणशीलः, मुनिवृत्तितयाचवनेनिवासः, वनेवानिवासः, “घुमन्तू” इतियआजीवकायाःकृतेजीवनपद्धतिरेववातादृशीवर्ततेसयायावरःभवति।भारद्वाजऋषेःकथनंप्राप्यते, येपक्षेएकवारमग्निहोत्रंविदधतितेयायावराःसन्ति**यायावरनामब्राम्हणाआसंस्तेअर्धमासादग्निहोत्र-भजुन्ह।**

वस्तुतःमहाभारतकालेस्मिन्यायावरनाम्नएकःऋषिरासीत्यायावरवर्गेषुचजरत्कार्विर्तिनाम्नःऋषेःविवरणंउद्धृतमस्ति।यथा-

**जरत्कारुरितिख्यातऊर्ध्वरेतामहातपाः।**

**यायावराणांप्रवरोधर्मज्ञःसंशितव्रतः॥**[i]

किन्तुउपर्युक्तार्थेविचारंक्रियतेतर्हिजानीमःयत्रामायणेऽपिविभिन्नरूपेषुयायावराणांप्राचुर्येणवर्णनंविद्यते।यथा- रामायणशब्दस्यार्थएववर्तते “रामस्यअयनमितिरामायणं” अयनमितिगतिःविचरणंवाअर्थात्रामायणंस्वयमेवमेकंगतिशीलजीवनस्यप्रक्रियायाःवैश्विकस्वीकृतिरस्ति।यद्यपिरामआसीद्राजकुमारःकिन्तुशापवशात्तेनयायावराणामिववनेषुविचरणंविधाय,

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|

||Volume 11, Issue 8, August 2022||

| DOI:10.15680/IJIRSET.2022.1108076 |

वनेष्वाश्रित्यमुनिवृत्तितयाजीवनस्यचतुर्दशवर्षाणिव्यतीतानिअतएवरामलक्ष्मणौयायावराणांपरम्परायामेवास्तामितिवक्तुंशक्यते।यथैकस्थलेऽस्मिन्रामशूर्पनखासंवादेरामःद्योतयतियदहमत्रधर्मपालनेच्छाहृदिनिधायधर्मत्राणोद्देश्यपूर्वकंवनेनिवासायात्रागतोऽस्मि-

**नियोगात्तुनरेन्द्रस्यपितुर्मातुश्चयन्त्रितः।**

**धर्मार्थंधर्मकांक्षीचवनंवस्तुमिहागतः॥**[ii]

प्रश्नश्शूर्पनखायाःरामंप्रति-

**शरीरजसमाविष्टाराक्षसीराममब्रवीत्।**

**जटीतापसवेषेणसभार्यःशरचापधृक्॥**

**आगतस्त्वमिमंदेशंकथंराक्षससेवितम्।**

**किमागमनकृत्यंतेतत्त्वमाख्यातुमर्हसि॥**[iii]

अर्थात्तपस्वीवेशान्वितःमस्तकेजटायुक्तःभार्ययासहशरचापधृतश्चकथंत्वमत्रागतोऽसि? प्रश्नोऽयंरामस्यमुनिवृत्तियुक्तंतपस्वीजीवनंविचरणशीलतांद्योतयत्यतःरामःस्वयमेवयायावरश्रेण्यामाविष्टते।

इममतिरिच्यमुनिपरम्परायांदृष्टिःनिक्षिप्यतेचेत्तर्हिप्राप्यतेयत्महद्दीर्घापण्क्तिरियंवर्तमानायस्यांपरम्परायांतेषांसमेषांमुनिवृन्दानांसमायोजनंभवतियेवनेषुतपस्वीरूपेणमुनिवृत्तितयावाजीवनंयापयिष्यन्ति।यथा-

वशिष्ठविश्वामित्रशतानन्दागस्त्यसुतीक्ष्णशरभङ्गभारद्वाजारुन्धत्यपालागार्गीघोषाप्रभृतयःविद्यन्ते,

एतेषांसमेषांसमायोजनमस्मिन्नेववर्गेभविष्यति।यथाऽत्रैकमुदाहरणम्मयाप्रस्तूयतेयस्मिन्महर्षिविश्वामित्रःकाममोहितःभूत्वामेनकयासहसम्भोगंविधायस्वतपंनष्टीकृतःअपराधबोधानन्तरेतत्स्थानंपरित्यक्त्यहिमवन्तमाश्रयणंकृतवान्।

**मेनकांमधुरैर्वाक्यैर्विसृज्यकुशिकात्मजः।**

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|

||Volume 11, Issue 8, August 2022||

| DOI:10.15680/IJIRSET.2022.1108076 |

**उत्तरंपर्वतंरामविश्वमित्रोजगामह॥**[iv]

तत्राऽपिसःसहस्रवर्षपर्यन्तंघोरंतपमकार्षीत्।इतःअपिरंभांशपयित्वापुनःउदीचीदिशञ्चत्यक्त्वाप्राचीदिश्यवलम्बितः।यथाहि-

**अथहैमवतींरामदिशंत्यक्त्वामहमुनि।**

**पूर्वांदिशमनुप्राप्यतपस्तेपेसुदारुणम्॥**[v]

अपिच-

**कृतकामोमहींसर्वांचचारतपसिस्थितः।**

**एवंत्वनेनब्रह्मण्यंप्राप्तंराममहात्मना॥**[vi]

एवंमहर्षिविश्वामित्रेणब्रह्मण्यमास्वापुनःमुनिवृत्तौस्थितःवसुधायांविचरणंकुरुतेस्म।एवमेवबह्वीप्रजातयःविद्यन्तेयेअरण्यवास्तव्याःसन्तियथानिषादराजः, वानरसम्प्रदायः, रीछसमुदायः।एतेसर्वेतस्मिन्नेवपरम्परायांविद्यमानाःसन्तिअतःरामायणमहाकाव्येविभिन्नस्वरूपेषुयायावारवर्गाणांवर्णनंलभतेयेषांविभिन्नविभागाःकर्तुंवयंशक्नुमःनिष्कर्षतःयायावरशब्दस्यबहवःअर्थाःसम्भवन्तितेषुप्रायशःसमेषुअर्थेषुरामायणकथायांयायावरसमूहाःविद्यन्तेइति।

## III. यायावरीप्रवृत्तिः

यायावरसमुदायःएकःईदृशःवर्गआसीत्, यआदिकालादेवगतिमान्वर्तते।तेषांजीवनं, चरित्रःस्वभावश्चनहिकेवलंएकापद्धतेःपरिचयंकारयतिस्मअपिचतेराष्ट्रहितायसमस्तमानवजातयेचप्रतिबद्धाःप्रयत्नशीलाश्चआसन्सन्तिच।प्रवृत्तिरेषायायावरीरामस्यभवेत्त्वेत्विश्वामित्रस्यवासमेषामुप-देशकवर्गाणांवाआधुनिकपरिप्रेक्ष्येवादृष्टिपातंक्रियेत्यदितर्हिगुप्तचराणांवा, प्रवृत्तिरनयानिरन्तरंसमाजस्योत्थानेराष्ट्रस्मृद्धौचाप्रतिममविस्मरणीयञ्चयोगदानंसम्पादितम्।समस्तविश्वेऽस्मिन्भारतस्यराजनैतिकं, साहित्यिकं, दार्शनिकं, धार्मिकञ्चास्तित्त्वमप्रतिममासीदेवितिसर्वविदितं, भारतःआदिकालादेवएषांविषयाणांप्राचुर्यत्वात्ख्यातिप्राप्तःअस्ति।तस्यख्यातेः,

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|
||Volume 11, Issue 8, August 2022||
| DOI:10.15680/IJIRSET.2022.1108076 |

प्रचुर्यतायाश्चैकंमहत्कारणंप्रवृत्ति-रेषायायावरीयायावरसमुदायश्चवर्तते।भारतीयपरम्परायान्तुपितरावपिपुत्रादिकानांक्षेमंविधाय, सम्पन्ना-वस्थायांदृष्ट्वावानप्रस्थाश्रममवलम्ब्येतेकिन्तुयायावराणांध्येयस्तुसमस्त-मानवजातेःकल्याणं, ज्ञानप्रसारणं, समृद्धिश्चासीत्।तेसमाजस्यजीवनस्यचव्यवस्थायांअनागताभ्यःविसङ्गतीभ्यःसुरक्षांबोधञ्चसमीहन्ते।यथा- अयोध्याकाण्डेताटकावधस्यकृतेविश्वामित्रेणस्वयज्ञरक्षणायरामंयाचयते-

**अहंकाममातिष्ठेसिध्यर्थंपुरुषर्षभ।**

**तस्यविघ्नकरौद्वौतुराक्षसौकामरुपिणौ॥**

**स्वपुत्रंराजशार्दूलरामंसत्यपराक्रमम्।**

**काकपक्षधरंवीरंज्येष्ठंमेदातुमर्हसि॥**[vii]

अर्थात्अहमेकंयज्ञविधानंकृतवान्किन्तुसुबाहुमारीचाभ्यांद्वाभ्यांराक्षसाभ्यांतत्यज्ञंबाधितःअतःराजन्! सत्यवानंज्येष्ठपुत्रंपराक्रमीरामंददातु, तर्हिअबाधरूपेणममयज्ञंसम्पद्येदिति।अरण्यकाण्डेऽस्मिन्नपिरामेणराक्षसेभ्यःत्रायतेवानप्रस्थानेतानिसुन्दराण्युदाहराणिविद्यमानानिसन्ति-

**ततस्त्वांशरणार्थंचशरण्यंसमुपस्थिताः।**

**परिपालयनोरामवध्यमानान्निसाचरैः॥**[viii]

अर्थात्हेराम! राक्षसैःबहवःप्रतिदिनंमुनयःहतःअतःएतेभ्यःनिसाचरेभ्यःअस्माकंरक्षत्विति।यायावरसमुदायाःरामायणकालेऽस्मिन्मुनिवृत्तितयाअरण्येआश्रमंपर्णकुटींवाकृत्वानिवसन्तिस्म "यत्करोतिपरंधर्मंमुनिर्मूलफ़लाशनः" किन्तुतेषुसमुदायेषुबहवःजन्मनःयायावराआसन्, केचन्नासन्कर्मणः।एतयोःद्वयोर्मध्येयेकर्मणःयायावराःसन्तितेषांमहत्वमन्यतममस्तियतोहिभरती

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|
||Volume 11, Issue 8, August 2022||
| DOI:10.15680/IJIRSET.2022.1108076 |

यायांपरम्परायांकस्याऽपिव्यक्तित्वस्यनिर्धारणंतस्यगुणानांकर्मणाञ्चाधारेभवति।यथागीतायांकृष्णेनोक्तमिति-

**चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागसः।**

**तस्यकर्तारमपिमांविद्ध्यकर्तारमव्ययम्॥**[ix]

## IV. निवासः

यायावरवर्गःघुमन्तूइतिवर्ततेतैःविचरणशीलवृत्याजनानामुत्थानंकार्यतेतस्यांविचरणशीलतायांराष्ट्रस्योद्भवंविद्यमानंभवति।तैःवर्गैःवनेभूत्वाआदर्शजीवनस्यसंकल्पनाप्रस्तूयते।तस्यादर्शवैदिक-जीवनस्यपरम्पराअग्रेप्रसरति।एतेनकेवलंवनेनिवसन्तिस्मअपितुपर्वतेष्वपिअविचरन्।एतेषांवनेषुपर्वतेषुचनिवासस्यप्रमाणानिरामायणेप्राप्नुवन्ति।रामायणेऋषीणांआश्रमाणांवर्णनंवर्ततेयथाविश्वमित्रस्याश्रमः, अगस्त्याश्रमः, वाल्मीकिराश्रमः, एवमेवनैकेषांऋषीणामाश्रमाःआसन्यत्रछात्रैस्सहमुनिकुमाराअपिस्वविद्यामाप्नुवन्तिवर्धयन्तिचस्म।यथा-

**अथरात्र्यांव्यतीतायांविश्वामित्रोमहामुनिः।**

**आपृष्ट्वातौचराजानौजगामुत्तरपर्वतम्॥**

**दारूणिपरिभिन्नानिवनजैरुपजीविभिः।**

**छिन्नाश्चाप्याश्रमेचैतेदृश्यन्तेविविधाद्रुमाः॥**

एतेआश्रमाःनगरवास्तव्यानांपथिकानाञ्चकृतेविश्रामस्थलमिवबभूव।यथा-रामःस्वयमेवबहूनांऋषीणामाश्रमेषुविश्रामंकृतवान्।लवणासुरवधप्रसङ्गेशत्रुघ्नोऽपिवाल्मीकिराश्रमेकिञ्चित्कालपर्यन्तंनिवसितवानासीत्।एवमेवशिवधनुषभङ्गप्रसङ्गेऽपिपरशुरामःआगतवानासीत्यःमहेन्द्रपर्वतमाश्रयतेस्म।अस्मिन्नेवसमुदायेकाचन्प्रजातयःआसन्येअरण्येनिवासंकुर्वन्तिस्मयथानिषादराजगुहः, शम्बूकप्रभृतयः।

## V. वसनम्

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|

||Volume 11, Issue 8, August 2022||

| DOI:10.15680/IJIRSET.2022.1108076 |

यायावरसमुदायेऽस्मिन्समाविष्टाःमुनयःयेआसन्तैःसात्विकरूपेणस्वजीवनानितत्रव्यतीता निवल्कलवस्त्राणिचधारितानि।प्रतिदिनंसन्ध्यापूजनहोमपूर्वकंअध्ययनमध्यापनञ्चाकार्षुः।यथा-

**सचीरेपुरुषव्याघ्रःकैकेय्याःप्रतिग्रह्यते।**

**सूक्ष्मवस्त्रमवक्षिप्यमुनिवस्त्राण्यवस्तह॥**

**ततस्तुजलशेषेणलक्ष्मणोऽप्यकरोत्सदा।**

**वाग्यतास्तेत्रयःसन्ध्यांसमुपासन्तसंहिताः॥**[x]

अध्ययनाध्यपनैस्सहचिन्तनंमननमपिएतेषांकार्याणिसन्त्येव।एतेषांसमेषांजीवनंईयच्छाधारणमासीद्यत्, जीवनपद्धतेःएकापरिग्रहरूपीअवधारणामजायत्।अवधारणायाःअस्याःअनन्तरंप्रसरिता, तथाचयायावरपरम्पराइमामाश्रयणंकृतंयस्यप्रसारःमहत्वञ्चाधुनिककालपर्यन्तंविद्यमानमस्ति।अपरिग्रहेअनायाससंग्रहणंवर्जयेत्, येनसमाजस्यजनेष्वनासक्तिःत्यागश्चइत्यादिमूल्याःअविकसन्। “अदत्तादानंपरिग्रहः” अर्थात्अदत्तवस्तोर्ग्रहणंपरिग्रहः, तस्योपरमणमपरिग्रहः।यायावराःसात्विकरूपेणजीवनंयापयन्तिअतएवसात्विकजीवनपद्धतिनायापनत्वात्यायावराणांभोजनमपिअरण्याधारितःअर्थात्वनेउत्पन्नानियानिफ़लानिमूलानिचविद्यन्तेस्मतेषामेवाहारन्तेऽकार्षुः।

## VI. निष्कर्षः

रामायणेबहवःउपदेशकाःप्रचारकाः(धर्मप्रचारकाः, आचारप्रचारकाः) विद्यन्ते। यथामहर्षिवाल्मीकिः, विश्वामित्रः, भारद्वाजः, अगस्त्यः, सुतीक्ष्णः, मतङ्गः, वशिष्ठः, दुर्वासा, नारदादयः। एतेषांसमेषांतत्रवर्णनंप्राप्यते।एतेसर्वेयायावरसमुदायेपरिगणितास्सन्ति। रामायणकालादनन्तरमपिबहवःप्रचारकाःउपदेशकाःवाबभूवुः। एषुवर्धमानस्वामी, गौतमबुद्धःइत्यादयःसमाविष्टाः।

महात्मनाबुद्धेनभारतस्यनवीनाजीवनपद्धतिःशोधिता।बुद्धेनबहवःसिद्धान्ताःसम्पादिताः।

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|

||Volume 11, Issue 8, August 2022||

| DOI:10.15680/IJIRSET.2022.1108076 |

तैरेवसिद्धान्तैःजगतिआसंसारेवाजीवनस्यैकःनवीनःमार्गःप्रदत्तः। अस्यानन्तरंभारतीयदर्शनानांमहत्ताइतोऽप्यावर्धिता।आर्यसत्यः, अष्टाङ्गिकमार्गः, क्षणिकवादःइत्यादीभिःसिद्धान्तैःमनुष्यजीवनस्योत्थानेऽपूर्वंयोगदानंनिगदितानि। एवमेवमहात्मनावर्धमानेनाऽपिभारतीयायांसंस्कृतौस्वविचारैनवीनकाजीवनपद्धतिःयोजिता। सत्याहिंसाऽपरि-ग्रहस्तेयादीनांसिद्धान्तानांप्रचारःविश्वेऽस्मिन्प्रतिपादितः। अतएवेयंप्रवृत्तिःयायावरीआसंसारेप्रसिद्धावर्त्तते। प्रवत्तिरनयासमाजेऽस्मिन्ज्ञानस्यअपूर्वज्ञानराशेः, संस्कृतेः, कलायाः च प्रसारितः। यस्मात्आर्यावर्तस्यसमृद्दियुक्तेःसमर्थसंस्कृतेःमहत्त्वंसम्पूर्णविश्वःअजानत्।

साहित्यसमाजस्यदर्पणभवति। सामाजिकव्यवस्थायांव्याप्तःआचारः, विचारःसांस्कृतिकपरम्पराश्चसाहित्येप्रतबिम्बितास्सन्ति। अतःसाहित्यंसंस्कृतेःपरम्पराणाञ्चविशुद्धाअभिव्यक्तिःवर्ततेअतएवसाहित्यआचाराणांवाहकःप्रसारकश्चभवति। संस्कृतवाङ्गमयंभारतीयसमाजस्यभव्यसांस्कृतिकस्यचिन्तनस्यरुचिरंदर्पणंद्योतते। सहस्रवर्षेषुप्रवाहमानास्वस्यांप्राञ्जलधारायांवयंयुगद्रष्टानांकल्पनानां, भावनानांसंकल्पानांप्रतिच्छायांसजीवरूपेणपश्यामः। संस्कृतवाङ्गमयस्याजस्रयाधारयावैदिककालादेवनिरन्तरंगतिमन्तंसमाजस्यउत्कर्षस्यमार्गंपल्लवितपुष्पितञ्चकुरुतेस्म। स्वसाहित्यिकेभ्यविविधतेभ्यःसंस्कृतसाहित्यंविश्ववाङ्गमयेअद्वितीयतामापद्यते।आदिकाव्यंवाल्मीकिरामायणभारयीयसाहित्यसागरस्यामूल्यःनिधिःवर्तते। वाल्मीकिरामायणमिदंलौकिकस्यमहाकाव्यविधायाःप्रथममुद्गानंभूत्वासम्पूर्णसमाजेआस्थायाःपर्यायबभूवरामायणकथायामस्यांविभिन्नप्रकाराणांऋषीणां, उपदेशकानांराज्ञांतपस्विनांसन्यासिनांमनुष्येतराणांसमुदायानांवर्णनंप्राप्यतेयेषांयायावरसमुदायेपरिगणनंभवितुंशक्नोतीति। इममतिरच्यरामायणउपजीव्यंकृत्वामहर्षिभिः, काव्यतत्वविद्भिःअस्यकामधेनुवदोहनंकृत्वाअभीष्टानिरत्नानिप्राप्तानि। अतएवरामायणं न केवलंसांस्कृतिकदृष्ट्यामहत्वपूर्णमपितुसाहित्यरूपेऽपिमहत्वपूर्णविद्यते। यतोहियावदस्मिन्संस्कृतेःसभ्यतायाश्चवर्णनंप्राप्यतेतत्रैवप्राचुर्येणसाहित्यिकोपजीव्यतामाप्नोति।

| e-ISSN: 2319-8753, p-ISSN: 2320-6710| www.ijirset.com | Impact Factor: 8.118|

||Volume 11, Issue 8, August 2022||

| DOI:10.15680/IJIRSET.2022.1108076 |

अतएवरामायणस्यमहत्वंसम्पूर्णसाहित्यसमाजेनसाकमेवऐतिहासिकसमाजेसांस्कृतिकसमाजे च विद्यतेइति ।

## VII. सन्दर्भग्रन्थाः

1) महाभारत, आदिपर्व, १३.७
2) वाल्मीकिरामायण, अरण्यकाण्ड, १७.१७
3) रामायण, अरण्यकाण्ड, १७.१२, १३
4) वा०, रा०, अरण्यकाण्ड, ६३.१३
5) वा०, रा०, अरण्यकाण्ड, ६५.०१
6) वा०, रा०, अरण्यकाण्ड, ६५.२८
7) वा०, रा०, बालकाण्ड, १९.८
8) वा०, रा०, बालकाण्ड, ६.१९
9) श्रीमद्भगवद्गीता, ४.१३
10) वा०, रा०, अयोध्याकाण्ड, ८८.१९

[i]महाभारत, आदिपर्व, १३/७
[ii]वाल्मीकिरामायण, अरण्यकाण्ड, १७/१७
[iii]रामायण, अरण्यकाण्ड, १७/१२, १३
[iv] वा०,रा०, अरण्यकाण्ड, ६३/१३
[v]वा०, रा०, अरण्यकाण्ड, ६५/०१
[vi]वा०, रा०, अरण्यकाण्ड, ६५/२८
[vii]वा०, रा०, बालकाण्ड, १९/८
[viii]वा०, रा०, बालकाण्ड, ६/१९
[ix]श्रीमद्भगवद्गीता, ४/१३
[x]वा०, रा०, अयोध्याकाण्ड, ८८/१९



Impact Factor: 8.118

# INTERNATIONAL JOURNAL OF INNOVATIVE RESEARCH

IN SCIENCE | ENGINEERING | TECHNOLOGY

9940 572 462 6381 907 438 ijirset@gmail.com

Scan to save the contact details

www.ijirset.com